

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Digitized by eGangotri

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M731 विषय धर्मशास्त्र
नाव. शुद्धिविवाहपद्धति/शुद्धमंत्रविचार. (मुद्रित)
लेखक/लिपीकार —
पृष्ठ 12 काळ सन 1895 पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ शूद्रविवाहपद्धतिः प्रारभ्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ।



श्रीगणाधिराजाय नमः॥ ॥ श्रीकर्मठाग्र्यपितृव्यज्येष्ठानंदशर्मणे नमः॥अथसच्छूद्राणां विवाहाख्यसंस्कारः ॥ शूद्रस्यशूद्रापरिणयनेमंत्ररहितंक्रियामात्रंकार्यमितिहारिहरभाष्येउक्तं॥तेनकातीयकर्मोच्यते॥ तत्रादौविवाहदिनेतत्पूर्वदिनेवाकन्यापिताप्रातर्मातृयागपुरःसरंनांदीश्राद्धंविधायविवाहोक्तेमुहूर्त्तेकन्यापितास्नातःशुक्लांबरधरोमंडपेउपविश्याऽऽचम्य॥देशकालौसंकीर्त्य॥ ममास्याःकन्यायाः जातकर्मादिविवाहांतपूर्वसंस्कारलोपजन्यप्रत्यवायपरिहारार्थंप्रतिसंस्काररंजतद्रव्यममुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे॥स्वस्तीतिप्रतिवचनम् ॥ एवंपूर्वसंस्कारलोपनिमित्तंदक्षिणांदत्त्वापुनर्देशकालौसंकीर्त्य।काश्यपगोत्रोऽमुकदासोहंममाऽस्याः कन्यायाभर्त्रासहधर्मप्रजोत्पादनगृह्यपरिग्रहधर्माचरणेष्वधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विवाहाख्यंसंस्कारकर्मकरिष्ये ॥ तदंगतयागणेशपूजास्वस्तिवाचननवग्रहपूजनादिकर्मकरिष्येइतिसंकल्प्य गणेशंपूजयेत् तत्रादौध्यानम्॥शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजं॥प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये॥ १॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभीप्सितार्थसिद्ध्यर्थंपूजितोयः सुरासुरैः॥सर्वविघ्नहरस्तस्मैगणाधिपतयेनमः ॥ २ ॥ सुमुख श्चैकदंतश्चकपिलोगजकर्णकः ॥ लंबोदरश्चविकटोविघ्ननाशोविनायकः॥ ३ ॥ धूम्रकेतुर्गणाध्य क्षोभालचंद्रोगजाननः॥द्वादशैतानिनामानि यः पठेच्छृणुयादपि ॥ ४ ॥ विद्यारंभे विवाहेचप्र वेशेनिर्गमेतथा॥संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ॥ ५ ॥ स्वस्तिश्रीमहागणाधिपतयेनमः ॥ अथातः संप्रवक्ष्यामिगणयागंसुखावहम्॥ कामकेवासकेयज्ञेविवाहे व्रतसंयमे॥ १ ॥आदौगणे श्वरंपूज्यसर्वकामफलप्रदम्॥मासमासाधिपंदेवंगाणपत्यंलभेन्नरः ॥ २ ॥ येनासौपूजितोयज्ञे मासाचार्यः प्रपूजितः ॥ कोसौमासपतिर्देवोह्यत्रधूपेनधूपितः॥ ३॥ ज्येष्ठमासेकृतंपूज्ययज्ञकाले सनातनम्॥मंडलंप्रथमंपूज्यकोष्ठद्वादशमुत्तमम्॥४॥सिंदूरेणार्चितोदेवईशान्यांतुविनायकः ॥ ग्रहयुक्तंततः स्थाप्यमासेमासेधिकं फलं ॥५॥गणाधिपं मार्गशीर्षेतथापौषे विनायकम् ॥ गजव क्रंचमाघेचभालचंद्रंचफाल्गुने॥६॥चैत्रमासेतुवेदांगंवैशाखेशिवसूनुकम्॥ ज्येष्ठेशिवसुतम् पूज्य

आषाढेहरनंदनं ॥ ७ ॥ श्रावणेतापसंदेवंभाद्रेमोदकभक्षकम् ॥ आश्विनेचमहावीर्यं महावीर्यंच कार्त्तिके॥८॥विघ्नहर्तारमधिकेमासिपूज्य गणेश्वरम्॥ गंधपुष्पैस्तथाधूपैःकर्पूरैर्यक्षकर्दमैः ॥ ९ ॥ मृगमदैःकुंकुमैश्चसिंदूरेणविशेषतः॥रक्तोत्पलदलैः पूज्यबिल्वपत्रेणकेशरैः॥ १० ॥मालतीकेतकी पुष्पैर्हेमपुष्पैर्विचक्षणः॥अर्घ्यंधूपंचदीपंचरक्तवस्त्रेणछादनम्॥ ११ ॥पूजायांकुरुतेदेवेदद्यान्मोदक भोजनम् ॥ नमोदेवगणेशायनमस्तेविघ्ननाशन ॥ १२ ॥ नमस्तेमूषकारूढशुभकारायवैनमः ॥ नमःकात्यायनीपुत्रलंबकर्णायवैनमः ॥ १३ ॥ गजदंतविरूपात्मन् विद्याबुद्धिविचक्षण ॥ देहि मेपुत्रसौभाग्यंदेहिमेसुखसंपदम् ॥ १४ ॥इच्छासमधिंपदेवंवरंविनायकेश्वरं ॥ शत्रूणांदुष्टायेकेचि द्दुर्जनारीचकर्षिले ॥ १५॥ तेषांदंडहितार्थायप्रार्थयेतुगणेश्वरम् ॥प्रथमंपूजागणेशस्यशांतिश्चैव विशेषतः ॥ १६ ॥ नाशयेत्सर्वदुष्टानिकल्याणंच भवेत्सदा ॥ कृष्णेनभाषितंपूर्वंदेवतापरिकीर्ति ता ॥ १७॥ मंडलंयत्रयज्ञेचभोक्तातत्रविनायकः ॥ गणयागविहीनस्यनिष्फलंतस्यजायते १८।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरतेसर्वविघ्नानित्वत्प्रसादोविनायक ॥ १९ ॥ इतिपठित्वाहस्तेपुष्पाण्यादाय ॥ हेहेरंबत्वमेह्येहि
अंबिकात्र्यंबकात्मज॥सिद्धिबुद्धियुतत्र्यक्षसर्वलोकपितःपितः॥ १॥नागास्यनागहारत्वंगणनाथ
चतुर्भुज ॥ भूषितः स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः ॥ २ ॥ आवाहयामिपूजार्थं रक्षार्थंचममक्र
तोः॥इहागत्यगृहाणत्वंपूजांरक्षचमेक्रतुम्॥३॥श्रीगणेशइहागच्छइहतिष्ठ इत्यावाह्य ॥ गणेशाय
नमःआसनंसमर्पयामि पाद्यंसमर्पयामि अर्घ्यंसम० आचमनीयंसम० जलस्नानंकारयामि
गंधंसमर्पयामि अक्षतान्सम० पुष्पाणिसम० धूपमाघ्रापयामि दीपंदर्शयामि नैवेद्यंसम०
आचमनं तांबूलं दक्षिणांचसमर्प्पयामि एवंषोडशोपचारैः संपूज्य ॥ वक्रतुंडमहाकायसूर्यकोटि
समप्रभ ॥ अविघ्नंकुरुमेदेव सर्वकार्येषुसर्वदा ॥ १ ॥ इतिप्रार्थयेत् ॥ अथस्वास्तिवाचनम्॥
करोतुस्वस्तितेब्रह्मास्वस्तिवापिद्विजातयः ॥ सरीसृपाश्चयेश्रेष्ठास्तेभ्यस्तेस्वस्तिसर्वदा ॥ १ ॥
ययातिर्नहुषश्चैवधुंधुमारोभगीरथः ॥ तुभ्यंराजर्षयः सर्वेस्वस्तिकुर्वंतुनित्यशः ॥ २ ॥ स्वस्तिते

स्तुद्विपादेभ्यश्चतुष्पादेभ्यएवच ॥ स्वस्त्यस्त्वपादकेभ्यश्चसर्वेभ्यः स्वस्तिसर्वदा ॥ ३ ॥ स्वाहा
स्वधाशचीचैवस्वस्तिकुर्वंतुतेसदा ॥ लक्ष्मीररुंधतीचैवकुरुतां स्वस्तितेऽनघ ॥४॥ असितोदेव
लश्चैवविश्वामित्रस्तथांगिराः ॥ स्वस्तितेद्यप्रयच्छंतुकार्त्तिकेयश्चषण्मुखः ॥५॥ विवस्वान्भग
वान्स्वस्तिकरोतुतवसर्वशः॥ दिग्गजाश्चैवचत्वारःक्षितिश्चगगनंग्रहाः ॥ ६ ॥अधस्ताद्धरणींयो
सौनागोधारयतेसदा ॥ शेषश्चपन्नगश्रेष्ठः स्वस्तितुभ्यंप्रयच्छतु ॥ ७ ॥ इति ब्राह्मणावदेयुः ततः
पुण्याहवाचनंकुर्यात् ॥ अथनवग्रहपूजनम् ॥ हस्तेपुष्पाण्यादाय ॥दिवाकरंसहस्रांशुंसुरासुरनम
स्कृतम्॥लोकनाथंविश्वनेत्रंसूर्यमावाहयाम्यहम्॥ १॥भगवन्सूर्यइहागच्छइहतिष्ठ॥ हिमरश्मिनि
शानाथंक्षीरसागरसंभवम् ॥ औषधीनांतुराजानंसोममावाहयाम्यहम्॥२॥भोसोमइहागच्छइह
तिष्ठ॥धरणीगर्भसंभूतंलोहितांगंसुवर्चसम् ॥ कुमारंक्रूरकर्माणं भौममावाहयाम्यहं॥३॥भोभौम
इहा०॥ बुधंबुद्धिप्रदातारंसोमवंशविवर्धनं ॥ यजमानहितार्थायबुधमावाहयाम्यहं ॥४॥भोबुध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इहा० ॥ बुद्धिश्रेष्ठोंगिरःपुत्रोदेवानांयोगुरुःस्मृतः॥ तमिंद्रमंत्रिणंभक्त्यागुरुमावाहयाम्यहम्॥भो
गुरोइहा० ॥ ५ ॥ प्रविष्टोजठरंशंभोर्निस्सृतः पुनरेवयः ॥ तंसुरारिगुरुंभक्त्याशुक्रमावाहयाम्यहं
भोशुक्रइहा०॥६॥धर्मराजानुजंदेवंभिन्नांजनसमुद्भवम्॥छायामार्तंडसंभूतं शनिमावाहयाम्यहं॥
भोशनैश्चरइहा० ॥ ७ चक्रेणछिन्नमूर्द्धानंविष्णुनाचनिरीक्षितं ॥ सैंहिकेयंमहाकायंराहुमावाहया
म्यहं॥भोराहोइहा०॥८॥अंजनाभंमहारौद्रंबहुरूपंमहाग्रहं॥क्रूरकर्ममहाकायंकेतुमावाहयाम्यहं
भोकेतोइहागच्छइहतिष्ठ॥९॥ एवमावाहनंस्थापनंचकृत्वासूर्यादिग्रहेभ्योनमइतियथाविधिपूज
येत्॥अथप्रार्थना॥ब्रह्मामुरारिस्त्रिपुरांतकारिर्भानुः शशीभूमिसुतोबुधश्च ॥ गुरुश्चशुक्रःशनिराहु
केतवः सर्वेग्रहाःशांतिकराभवंतु॥१॥ तत्रेशानकोणेअव्रणंकलशंस्थापयेत् ॥ तस्यविधिः ॥तत्रा
दौभूमिंसंपूज्य॥पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता॥कलशाधारभूतंहिपवित्रंकुरुचासनं
इतिभूमिंस्पृशेत्॥ १ ॥ तत्र॥यवोसिधान्यराजोसिसर्वोत्पत्तिकरःशुभः ॥ प्राणिनांजीवनोपायः

कलशाधःक्षिपाम्यहं ॥ इतिधान्यंक्षिप्त्वातस्योपरि कलशं स्थापयेत् ॥ गंगेचयमुनेचैवगोदावरि
सरस्वति ॥ नर्मदेसिंधुकावेरिकुंभेऽस्मिन्सन्निधिंकुरु॥ इतिजलेनापूर्यगंधंक्षिप्त्वा ॥ सर्वौषध्यः
पंचपल्लवान् दूर्वांपंचरत्नानिचनिक्षिपेत्॥ततः॥जीवनंसर्वलोकानांलज्जायारक्षणंपरम्॥ सुवेषधा
रिवस्त्रंहि कलशेवेष्टयाम्यहमितिवस्त्रेणसंवेष्टच॥धान्यपूर्णमिदंपात्रंस्थापितंकलशेयतः ॥ तेनायं
कलशःपूर्णःपूर्णाःसंतुमनोरथाः॥इतिपूर्णपात्रंनिधायश्रीफलंधृत्वापुष्पमालादिभिःशोभितंकुर्यात
तत्रगणेशवरुणौपूजयेत्। लंबोदरंमहाकायंगजवक्त्रंचतुर्भुजं ॥ आवाहयाम्यहंदेवंगणेशंशिद्धिदा
यकं ॥ भोगणेशइहागच्छेहतिष्ठ॥ मकरस्थंपाशहस्तंशुभ्रवर्णंकिरीटिनं ॥ आवाहयेप्रतीचीशंवरु
णंजलनायकम् ॥ भोवरुणइहागच्छेहतिष्ठइत्यावाह्यगणेशवरुणाभ्यांनमइति पूजयेत्॥ततःकल
शप्रार्थना कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः॥मूलेतस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः
॥१॥कुक्षौतुसागराः सप्तसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदः सामवेदोप्यथर्वणः॥ २॥ अंगै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वसहिताः सर्वेकलशंतुसमाश्रिताः ॥ देवदानवसंवादे मथ्यमानेमहोदधौ॥३॥उत्पन्नोसियदाकुं
भविधृतोविष्णुनास्वयं॥त्वत्तःसर्वाणितीर्थानिदेवाः सर्वेत्वयिस्थिताः ॥४॥त्वयिष्ठन्तिभूतानि
त्वयिप्राणाः प्रतिष्ठिताः॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः॥५॥आदित्यावसवोरुद्रा
विश्वेदेवाः सपैतृकाः ॥ सर्वेपित्वयितिष्ठंति यतः कामफलप्रदाः॥६॥त्वत्प्रसादादिमंयज्ञंकर्तुमी
हेजलोद्भव ॥ सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदा ॥ ७ ॥ इतिकलशस्थापनम् ॥ ततोगौरसर्षपा
क्षतविकिरणम्।गणाधिपंनमस्कृत्यनमस्कृत्यपितामहं।विष्णुंरुद्रंश्रियंदेवींवंदेभक्त्यासरस्वतीं १
स्थानाधिपंनमस्कृत्यग्रहनाथंनिशाकरं ॥ धरणीगर्भसंभूतंशशिपुत्रंबृहस्पतिं ॥२॥दैत्याचार्यंन
मस्कृत्यसूर्यपुत्रंमहाग्रहं ॥ राहुंकेतुंनमस्कृत्ययज्ञारंभेविशेषतः ॥ ३ ॥ शक्राद्यादेवताःसर्वामुनीं
श्चकथयाम्यहं॥गर्गंमुनिंनमस्कृत्यनारदंमुनिसत्तमं॥४०वसिष्ठंमुनिशार्दूलंविश्वामित्रंतथैवच॥
व्यासं मुनिं नमस्कृत्यसर्वशास्त्रविशारदं ॥ ५ ॥ विद्याधिकायेमुनयः आचार्याश्चतपोधनाः॥

तान्सर्वान्प्रणमाम्येवयज्ञरक्षाकरान्सदा ॥ ६॥ पूर्वे रक्षतुगोविंदआग्नेय्यांगरुडध्वजः ॥ याम्यां
रक्षतुवाराहोनारसिंहस्तुनैर्ऋते ॥ ७॥ वारुण्यांकेशवोरक्षेद्वायव्यांमधुसूदनः॥उत्तरेश्रीधरोरक्षेदी
शानेतुगदाधरः॥८॥ऊर्द्धंगोवर्द्धनोरक्षेदधस्ताच्चत्रिविक्रमः॥ एवंदशदिशोरक्षेद्वासुदेवोजनार्दनः
॥९॥शंखोरक्षेच्चयज्ञाग्रेपृष्ठेखड्गस्तथैवच ॥ वामपार्श्वेगदारक्षेद्दक्षिणेतुसुदर्शनः ॥ १० ॥ ब्रह्मा
णंमाधवोरक्षेत्त्वाचार्यंपातुमाधवः ॥ अच्युतोऽवतुऋग्वेदंयजुर्वेदमधोक्षजः ॥ ११ ॥ कृष्णश्चसाम
गंरक्षेदाथर्विकंचमाधवः ॥ उपदेष्टातुयोविप्रस्तंरुद्रोऽवतुसर्वदा ॥१२॥यजमानंसपत्नीकंकमला
क्षश्चरक्षतु॥रक्षाहीनंतुयत्स्थानं तत्सर्वंरक्षतांहरिः॥१३॥यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा॥
स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु ॥ १४ ॥ अपक्रामंतुभूतानि पिशाचाःसर्वतोदिशं ॥
सर्वेषामविरोधेनशुभकर्मसमारभे॥१५॥इतिरक्षाविधानम्॥अथाचार्यादिवरणंकार्यं तत्रादौब्राह्म
णानांहस्तेषुरक्षाबंधनंगंधादिनापूजनंचकुर्यात्॥ततआचारात्यजमानवरयोरपि॥येनबद्धोबली

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजादानवेंद्रोमहाबलः ॥ तेनत्वामपिबध्नामिरक्षेमाचलमाचल॥इतिकंकणबंधनं ॥ लक्ष्मीनारा
यणौदेवौसावित्रीकमलासनौ ॥ पार्वतीशंकरौदेवौमंगलंतिलकंददुः॥ १॥इतितिलकाशीर्वादः॥
ततःकन्यापितागृहागतंवरंसमानेनोपावेशयित्वाऽऽसनंदत्त्वामधुपर्कपूजांकुर्यात्।ततोदातापश्चा
त्तिष्ठंतंवरंसाधुभवानास्तामर्चयिष्यामोभवंतमितिब्रूयात्॥अर्चयेतिवरः।ततोविष्टरमादाय-विष्ट
रोविष्टरोविष्टरइत्यन्येनोक्तेविष्टरःप्रतिगृह्यतामितिदातावदेत्विष्टरंप्रतिगृह्णामीत्यभिधाय विष्टरं
गृहीत्वाविष्टरायनमइत्यासनेपादंदत्त्वोपविशेत्॥ततः पाद्यमंजलिनादाय।पाद्यंपाद्यंपाद्यमित्युक्ते
पाद्यंप्रतिगृह्यतामितिदद्यात् ॥ तेनवर आदौसव्यंततोदक्षिणमितिपादौप्रक्षालयेत् ॥ ततः
पूर्ववत्पुनर्विष्टरदानं ॥ ततोगंधपुष्पाक्षततिलसर्षपदधिदूर्वायुतमर्घ्यपात्रमादाय अर्घ्योऽ
र्घ्योऽर्घ्यइतित्रिरुक्ते दाताअर्घ्यः प्रतिगृह्यतामितिदद्यात् ॥ वरस्तमअद्भ्योनमइत्यंजलिनादाय
शिरसाभिवाद्यभूमौक्षिपेत्॥ततोऽन्येनआचमनीयमिति त्रिरुक्ते दातादत्तंप्रतिगृह्यसकृत्प्राश्याच

मेत् ॥ ततःकांस्यपात्रस्थदधिमधुघृतानिकांस्यपात्रपिहितान्यादायमधुपर्कोमधुपर्कोमधुपर्कइ
त्युक्तेमधुपर्कःप्रतिगृह्यतामितिदातावदेत् ॥ मधुपर्कंप्रतिगृह्णामीत्यभिधायदातृहस्तस्थमुद्घाट्य
सवित्रेनमइत्यवेक्ष्य । सवित्रेनमइतिप्रतिगृह्य । वामहस्तेकृत्वामधुपर्कायनमइत्यनामिकयालो
ड्यानामिकांगुष्ठाभ्यां बहिःक्षिप्त्वापुनरेवंद्विःकृत्वा अनामिकांगुष्ठाभ्यामेवत्रिःप्राश्नीयात् ॥
ततःशेषमसंचरेदेशेनिनीयद्विराचम्यांगानिसंस्पृशेत् ॥ वाचेनमइतिमुखे प्राणेभ्योनमइतिन
सोःचक्षुभ्यांनमइतिचक्षुषोः ॥ श्रोत्राभ्यांनमइतिकर्णयोः ॥ बलायनमइतिबाह्वोः ॥ ओज
सेनमइत्यूर्वोः ॥ अंगेभ्योनमइतिअंगेषु ॥ एवंहस्ताभ्यामास्यादिप्रत्येकंगात्राणिस्पृष्ट्वा ॥
गौगौंगौंरित्यनेनोक्तेयजमानेचप्रत्युक्ततोवरःरुद्राणांमात्रे वसूनांदुहित्रेआदित्यस्वस्रेगवेनमः॥
इतिनत्वाममार्चकस्यचपाप्माहतइत्युच्चैर्ब्रूयात् ॥ ततोदातावस्त्रालंकारगंधस्रगाद्यैर्वरंपूज
येत् ॥ ततोंतःपटमपसार्यवरोवधूमुखमीक्षेत ॥ ततआचार्योवेद्यांहस्तमात्रस्थंडिलंदर्भैः
परिसमुह्य गोमयेनोपलिप्य यज्ञियकाष्ठेनप्रागग्रास्तिस्रोरेखाः कृत्वात्रिर्मृदमुद्धृत्याभ्युक्ष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निंप्रतिष्ठापयेत् ॥ ततोऽग्निंसंपूज्य कौतुकागाराद्वरः कन्यापितावाकन्यामानीयमंडपेउपवे
श्यकन्याद्वारागणेशंसंपूज्यततः कन्यापितावरायवस्त्रचतुष्टयंदद्यात् ॥ ततोवरोवस्त्रचतुष्टयम
ध्येद्वे आयुष्मतीदंवासः परिधत्स्वेति आवृत्यादद्यात् साचवाससेनम इत्यावृत्त्यापरिदध्यात् ॥
ततोदात्रावधूमीक्षस्वेतिप्रेषितोवधूमीक्षेत ॥ ततःकन्याप्रदकर्तृकंग्रंथिबंधनं हस्तलेपनं शाखो
च्चारणंच॥अथकन्यादानम् ॥ तत्रादौ कन्यापिताउदङ्मुखउपविश्यस्वदक्षिणेपत्नीमुपवेश्यआ
चमनंकृत्वा देशकालौसंकीर्त्य ॥ ममसमस्तपितॄणांनिरतिशयसानंदब्रह्मलोकावाप्त्यादिकन्या
दानकल्पोक्तफलावाप्तयेऽनेनवरेणास्यां कन्यायामुत्पादयिष्यमाणसंतत्याअष्टावरान्अष्टौपरा
न्पुरुषान्पवित्रीकर्तुमात्मनश्चलक्ष्मीनारायणप्रीतयेप्राजापत्यविवाहविधिनाकन्यादानमहंक
रिष्यइत्युक्त्वापठेत् ॥ कन्यांकनकसंपन्नांकनकाभरणैर्युतां ॥ दास्यामिविष्णवेतुभ्यंब्रह्मलोकजि
गीषया ॥ १ ॥ विश्वंभरःसर्वभूताः साक्षिण्यःसर्वदेवताः ॥ इमांकन्यांप्रदास्यामिपितॄणांतारणा

यच॥२॥इति पठित्वा ॥ ततः कांस्यपात्रेवरहस्तोपरिवधूहस्तंन्यस्यवरहस्तेकिंचित्किंचिज्जलं
क्षिपेत्॥सुप्रोक्षितमस्तुशिवाआपःसंतुसौमनस्यमस्तुइत्युक्त्वा कन्यातारयतुपुण्यंवर्धतांशांतिः
पुष्टिस्तुष्टिश्चास्तुतिथिकरणमुहूर्त्तनक्षत्रसंपदस्तु पुण्याहंभवंतोब्रुवंतुपुण्याहमितिविप्राःस्वस्तिभ
वंतोब्रुवंतुऋद्धिंभवंतोब्रुवंतुश्रीरस्त्वतिभवंतोब्रुवंतुअस्तु श्रीरितिविप्राःततोदेशकालौसंकीर्त्यम
ममसमस्तपितॄणांनिरतिशयसानंदब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तयेऽनेनवरेणाऽ
स्यांकन्यायामुत्पादयिष्यमाणसंतत्याअष्टावरान्अष्टौपरान्पुरुषान्पवित्रीकर्तुमात्मनश्चश्रील
क्ष्मीनारायणप्रीतये काश्यपगोत्रस्यअमुकदासस्यप्रपौत्रायअमुकदासस्यपौत्राय अमुकदासस्य
पुत्राय ॥ काश्यपगोत्रस्यामुकदासस्यप्रपौत्रीम्अमुकदासस्यपौत्रीम्अमुकदासस्यपुत्रीम्पुनरेवं
द्विरुच्चार्यअमुकगोत्रायामुकदासायवरायअमुकगोत्राममुकप्रैष्यांनाम्नींवाकन्यांप्रजापतिदैवत्यां
यथाशक्त्यलंकृतांप्रजोत्पादनार्थंसहधर्मचरणार्थंभार्यात्वेनतुभ्यमहंसंप्रददेइतिकुशयवयुतंजलंक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्याहस्तंचवरहस्तेक्षिपेत्॥वरःप्रतिगृह्णामिस्वस्तीत्युक्त्वाभुवंस्पृशेत्॥गौरींकन्यामिमांभोत्वंय
थाशक्तिविभूषिताम्॥गोत्रायचैवदासायतुभ्यंदत्तांसमाश्रय॥१॥कन्येममाग्रतोभूयाःकन्येमेदेवि
पार्श्वयोः॥कन्येमेपृष्ठतोभूयास्त्वद्दानात्स्वर्गमाप्नुयाम्॥२॥ममवंशकुलेजातापालितावत्सराष्टक
म् ॥ तुभ्यंदासमयादत्तापुत्रपौत्रविवर्द्धिनीइतिपठेत् ॥ ततःकन्यादानप्रतिष्ठार्थंसुवर्णंगोमिथुनंच
दद्यात्॥ततःशक्तौसत्यांकांस्याऽरकूटपात्रगवाश्वदासीदासादिदद्यात् । कन्याबांधवाश्चयौतकंद
द्युः॥ततोवरोमांगल्यतंतुनानेनभर्तृजीवनहेतुना॥कंठेबध्नामिसुभगेत्वंजीवशरदांशतमितिसौभा
ग्यतंतुंवधूगलेबध्नीयात्॥ततोविश्वदेवायुमातविश्वधातृभ्योनमइतिवधूमीक्षेत ॥ ततोवरोवध्वाद
क्षिणहस्तंसांगुष्ठंमांगल्यद्रव्यसहितमुत्तानेनहस्तेनगृहीत्वानिष्क्रम्याग्निसमीपमागच्छेत् ॥ अत्रा
वसरेकश्चिज्जलपूर्णंकुंभंस्कंधेनिधायाग्नेर्दक्षिणतउत्तरतोवाऽभिषेकपर्यंतंवाग्यतऊर्ध्वंतिष्ठेत्ततो
वधूपित्रापरस्परंसमीक्षितव्यमित्युक्तेऽन्योन्यंसमीक्ष्य॥अरौद्रचक्षुरपतिघ्नीशिवाचसुमनास्तथा

सुवचःपुत्रसूर्देवकामाचसुखदाभवइतिवरोवदेत् ॥ सोमगंधर्वाग्निपूषभ्योनमइतिनमेत्॥अथाग्नि
कर्म ॥ गुरुर्दक्षिणेब्रह्मासनंदत्त्वा तमुपवेश्य॥मृन्मयेपात्रेजलपूर्णेकुशान्निधायउत्तरतः कुशेषुनि
धायाग्निंदर्भैः पूर्वादिपरिस्तीर्याऽऽसादनं कुर्यात् त्रीणितृणानि ॥ द्वेपवित्रे॥प्रोक्षणी ॥ आज्य
स्थाली॥संमार्गकुशाः ॥ उपयमनकुशाः ॥तिस्रः समिधः॥स्रुवः॥आज्यम्॥तंडुलाः ॥ लाजाः
॥शूर्पम्॥ अश्मा॥गौः॥दक्षिणा॥ पूर्णपात्रम् ॥ इतिधृत्वा ॥ ततःप्रादेशमात्रेपवित्रेछित्त्वाप्रोक्षणीं
संस्कृत्यपवित्राभ्यामुत्पूयतत्रतेनिधायदक्षिणेनसव्येकृत्वाऽङ्गिनं कृत्वा पात्राणिप्रोक्ष्यनिधाय
आज्यंस्थाल्यांनिरूप्य अग्नौअधिश्रित्यउल्मुकेनपर्यग्निकृत्वास्रुंवप्रतप्य कुशैः संमृज्यप्रोक्षिणी
भिःप्रोक्ष्य पुनः प्रतप्यदक्षिणेनिधायाऽऽज्यमुद्वास्योत्पूयाऽवेक्ष्यलोमादिनिरस्य पुनः प्रोक्षणी
रुत्पूर्यावेक्ष्योपयमनकुशान्वामहस्तेकृत्वा उत्थायाऽग्नौतिस्रःसमिधःक्षिप्त्वा प्रोक्षणीजलेनपर्यु
क्ष्यवरेणान्वारब्धोगुरुर्दक्षिणंजान्वाच्यब्रह्मणान्वारब्धश्च स्रुवेणजुहुयात् । विप्रद्वारास्वाहांतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

होमःप्रजापतयेस्वाहा इदंप्रजापतये इंद्रायस्वाहा इदमिंद्राय इत्याघारौ। अग्नयेस्वाहा इदमग्नये सोमायस्वाहा इदंसोमाय इत्याज्यभागौ।अग्नयेस्वाहा इदं०वायवेस्वाहा इदं०सूर्यायस्वाहा इदं० अग्नीवरुणाभ्यांइदं०वरुणसवितृविष्णुविश्वेदेवमरुत्स्वर्केभ्यःस्वाहाइदं०वरुणायादित्यायादित येप्रजापतयेस्वाहा इदं।ततःअग्नये०इतित्रिःअतःपरम्।मृत्यवेस्वाहाइदं०ततोग्निप्रोक्ष्यलाजाहोमं कुर्यात्।ततःकन्यांजलौवध्वाःभ्राताशमीपत्रमिश्रान्लाजान्शूर्पादंजलिनाद्विःक्षिपतिततोभिघार्य तिष्ठतीअग्नयेनमइतित्रिर्जुहुयात् ततोवरोवध्वादक्षिणंहस्तंसांगुष्ठमुत्तानेनहस्तेनगृह्णीयात् तत्रमंत्रः भगार्यमसवितृभ्योनमः।वित्तसौभ्यगुणैर्युक्तावीरसूर्जीवसूर्भव॥कुलेमदीयेसम्राज्ञीमच्चित्तानुगता सदा॥१॥ततोगृहीतामेववधूमुत्तरतोग्नेर्दक्षिणपादेनाश्मानमारोहयतिकन्यायैनमःसरस्वत्यैनमइति गाथागायंति।ततोग्नेवधूःपश्चाद्वरः॥अग्नयेनमइतिअग्निंपरिक्रम्य॥पुनःपूर्ववत् द्विर्लाजादिपरिक्रमान्तं कृत्वाचतुर्थेशूर्पकोणेनवधूभ्रातासर्वलाजान्कन्यांजलावावपतितान्भगायनम इतितिष्ठंतीजुहो

ति॥ततोग्निंचतुर्थेग्रेवरः पश्चाद्वधूःपरिक्रम्योपविश्य ब्रह्मणान्वारब्धः प्रजापतयेनमइतिहुत्वाउत्त रतःउदकूसंस्थान्सप्ततंडुलपुंजान्कृत्वावधूंविष्णवेनमः इतिदक्षिणेनपदावरःसप्तपदानिक्रामति इषेनमः विष्णवेनमः सर्वत्र ॥१॥ऊर्जेनमः॥२॥रायस्पोषायनमः॥३॥मायोभवाय नमः॥४॥ प्रजाभ्योनमः॥५॥ ऋतुभ्योनमः॥६॥सखिभ्योनमः ॥७॥ इतिएतैरपिकेचित् ॥ (अत्रग्रंथां तरोक्ताः श्लोकाः) वरंप्रति कन्यावाक्यम् ॥ तीर्थव्रतोद्यापनदानयज्ञान्मयासहत्वंयदिकांतकु र्याः॥ वामांगमायामितदात्वदीयंजगादवाक्यंप्रथमंकुमारी॥१॥ हव्यप्रदानैरमरान्पितॄंश्चकव्य प्रदानैर्यदिपूजयेथाः ॥ वामांगमायामितदात्वदीयंजगादकन्यावचनंद्वितीयम् ॥ २ ॥

१ अत्रसेवरदानमितिलोकाचारः ततः कन्यावरयोरंतःपटम्। तत्रापिपाठीलोकाचारात्। स्थानंप्रधानंनबलंप्रधानंस्थाने स्थितः कापुरुषोऽपिधीरः॥ जानामिनागेंद्र तवप्रभावंकण्ठेस्थितोगर्जसिशङ्करस्य ॥१॥ गर्जंद्यदातृणवच्छेदयामिदृष्ट्वाब्रह्मा देवतानांचमुख्यः ॥ वैरमध्येवैनतेयपृदाक्षोस्तयोरन्तःपटमादत्तनूनम् ॥ ३ ॥ मण्डपंमधुपर्कंचलाजाहोमस्तथैवच ॥ यावत्कन्यानवामांगेतावत्कन्याकुमारिका ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुटुंबरक्षाचरणेयदित्वंकुर्याःपशूनांपरिपालनंच॥वामांगमायामितदात्वदीयंजगादकन्यावचनं
तृतीयम् ॥ आयव्ययंधान्यधनादिकानांपृष्ट्वानिवेशंप्रगृहंविदध्याः॥वामांगमायामितदात्वदीयं
जगादकन्यावचनंचतुर्थम्॥४॥देवालयारामतडागकूपवापीर्विदध्यायदिपूजयेथाः ॥वामांगमा
यामितदात्वदीयंजगादकन्यावचनंचपंचमम्॥५। देशांतरेवास्वपुरांतरेवायदाविदध्याःक्रयविक्र
यंत्वम्॥वामांगमायामितदात्वदीयंजगादकन्यावचनंचषष्ठम्॥६॥ नसेवनीयापरकीययोषित्त्व
याभवेद्भावनकामनाति॥वामांगमायामितदात्वदीयंजगादकन्यावचनंचसप्तमम्॥७॥वरउवाच
मदीयचित्तानुगतश्चचित्तं सदामदाज्ञापरिपालनंच॥ पतिव्रताधर्मपरायणात्वंकुर्याःसदासर्वमिमं
प्रयत्नम्॥१॥ततःपूर्वकुंभोदकेनगुरुःआम्रपल्लवैरभिषिंचेत् ततोवरेणसूर्यमुदीक्षस्वेत्युक्त्वासूर्याय
नमइतिसूर्यंपश्येत्॥अस्तमितेध्रुवंपश्येत् ध्रुवायनमइति॥ततोममतवचित्तवाग्भ्योनमइतिवधूद
क्षिणांसोपरिहस्तंनीत्वाहृदयमालभ्यवामभागेवधूमुपवेश्यवध्वेनमइत्यभिमंत्र्यसीमंतेसिंदूरंदत्त्वा

वधूमुत्थाप्य ॥ गोश्वपुरुषेभ्योनम इत्यानडुहेचर्मणिवधूमुपवेशयेत्॥ततः अग्नयेस्विष्टकृतेनम
इतिहुत्वासंस्रवप्राशनंप्रणीताजलेनपवित्राभ्यांमार्जनंतयोरग्नौक्षेपःआचार्यायगोदानंप्रणीतावि
मोकः॥ब्रह्मणेपूर्णपात्रदानंब्रह्मग्रंथिविमोकः अग्नयेस्वाहाइतिबर्हिर्हुत्वा ॥ नमोभगवतेवासुदेवाय
इतिपूर्णाहुतिंदद्यात्॥ततोब्राह्मणेभ्योभूयसींदक्षिणांदत्त्वागणेशादीन्विसृजेत्॥ तत्रत्रिरात्रमेकरा
त्रंवाऽक्षारालवणाशिनौ ब्रह्मचारिणावलंकुर्वाणावधःशायिनौदंपतीस्यातां तैलाक्षतचंदनादिय
थाचारंकुर्यात् ॥ चतुर्थ्यामपररात्रेचतुर्थीकर्मकार्यम् ॥ श्रीरामकृष्णपौत्रेणकस्तूरीचंद्रसूनुना ॥
कृताचतुर्थीलालेनसच्छूद्राणांहिपद्धतिः ॥१॥ इतिश्रीबीकानेरविषयांतर्गतरत्नगढनगरनिवासि
नाश्रीवसिष्ठगोत्रोद्भवेनश्रीरामकृष्णामरचंद्रपौत्रेणश्रीचतुर्भुजदत्तसूनुनाकस्तूरीचंद्रात्मजेनश्री
महादेवभक्तवाजसनेयिनाश्रीचतुर्थीलालकर्मठाग्र्येणकृताशूद्रविवाहपद्धतिः समाप्ता ॥
कर्मठाग्र्यकस्तूरीचंद्रात्मजचतुर्थीलालशर्मा, रत्नदुर्गः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथशूद्राणांवेदमंत्रविचारः ॥ तत्रअविद्यत्वाद्वेदमंत्रेनाधिकारः ॥ व्यासजातूकर्ण्यौ ॥ शूद्रोवर्णश्च तुर्थोपिवर्णत्वाद्धर्ममर्हति ॥ वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विना ॥ नृसिंहरामतापनीये ॥ सावित्रींप्रणवंयजुर्लक्ष्मींयदिजानीयात्स्त्रीशूद्रःसमृतोऽधोगच्छति ॥ व्याहरणेजिह्वाछेदइतिश्रुतेश्च ॥ स्कांदेपि ॥ स्वाहाप्रणवसंयुक्तंशूद्रेमंत्रंददद्विजः ॥ शूद्रोनिरयमाप्नोतिब्राह्मणःशूद्रतामियात् ॥ एवंपुराणविष्णुसहस्रनामस्तोत्रादिपाठेप्यनधिकारःवेदांगत्वात् ॥ तदुक्तंहरिवंशे ॥ सुगतिमियाच्छ्रवणाच्चशूद्रजातिरिति ॥ हेमाद्रौ ॥ आवाहनादिकर्तव्यंयथाशूद्रेणतच्छृणु ॥ देवानांदेवनाम्नातुपितॄणांनामगोत्रतः ॥ व्यासजातूकर्ण्यौ ॥ अधिकारीभवेच्छूद्रःपूर्तधर्मेनवैदिके ॥ भारतेपि ॥ मंत्रवर्जंनदुष्यंतिकुर्वाणाःपौष्टिकींक्रियाम् ॥ वृद्धपराशरः ॥ दक्षिणार्थंतुयोविप्रःशूद्रस्यकारयेद्धविः ॥ ब्राह्मणस्तुभवेच्छूद्रःशूद्रस्तुब्राह्मणो भवेत् ॥ अत्रमाधवाचार्यः ॥ योविप्रः शूद्रस्यदक्षिणामादायतदीयंहविः शांतिपुष्ट्यादिसिद्धयेवैदिकैर्मंत्रैर्जुहोतितत्रविप्रस्यैव दोषः शूद्रस्तुहोमफलंलभेत् ॥ यमः ॥ शूद्रोप्येवंविधःकार्यो विनामंत्रेणसंस्कृतः । नकेनचित्समसृजच्छंदसातंप्रजापतिः ॥ छंदसामंत्रेण ॥ व्यासः ॥ नवैताःकर्णवेधांतामंत्रवर्जक्रियाःस्त्रियाः । शूद्रस्यामंत्रतोदश ॥ शूद्राणांकाश्यपगोत्रमितिहेमाद्रिः ॥ शूद्रावाजसनेयिनइतिदक्षोक्तेः ॥ शूद्राणांसंस्कारावाजसनेयिशाखयाकार्याइतिनिर्णयसिंधुकारः किंबहुना शूद्रकर्तृकविवाहशांतिदानश्राद्धादौविप्रस्यैवपौराणमंत्रपाठः ॥ शूद्रस्यतुश्रवणमात्रम् ॥

इतिशूद्रमंत्रविचारः ॥

इदं पुस्तकं मुम्बय्यां क्षेमराजश्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर"
स्टीम्-यन्त्रागारे मुद्रितम् । संवत् १९७२, शके १९३७.
यह पुस्तक खेमराज श्रीकृष्णदासने बम्बई खेतवाडी ७ वीं गली खम्बाटा लैन, निज "श्रीवेंकटेश्वर"
स्टीम् प्रेस अपने लिये छापकर यहीं प्रकाशित किया ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति शूद्रविवाहपद्धतिः समाप्ता ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=28.08.19 12:52
,TRANSFERRED=2019/08/28 at 12:56:57
,PAGES=14
,TYPE=STD
,NAME=S0001582
,Book Name=M-731-SHUDRAVIVAH PADHHATI SUDRA MANTRA VICHAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection